श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

विल्लूर् नडादूर् श्री श्रीनिधेः

# ॥ मञ्जुरामायणम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ मञ्जुरामायणम् ॥

कविताजितकल्लोलिकन्यकाकान्तवक्षसे।
करुणादिगुणाढ्याय कमलानिधये नमः॥

## ॥ सीताविवाहः प्रथमः सर्गः ॥

वन्दे वेङ्कटशेषदेशिकमणिं वात्सल्यवारान्निधिं
वंशे वत्सगुरोः कृतावतरणं वन्द्यं विपश्चित्तमैः।
साकेतं सहसा विहाय भगवान् स्थानं रघूणामिति
प्राप्तो यस्य हृदम्बुजं विजयते स्थानं गुरूणामिति॥ **1.1** ॥

वन्दे वागधिदेवतां भगवतीं वल्मीकजन्माननं
सिञ्चन्तीममृतेन रामचरिताभिख्येन सुख्यातिना।
यामन्तर्हृदयं क्षणं कलयतां सर्वत्र भाति क्षणः
या काऽपि क्षणदा मुदा विलसति ज्योत्स्नामयी सर्वदा॥ **1.2** ॥

"मातर्भारति!" "किं कवे?" "कवयितुं श्लोकान् प्रवृत्तोस्म्यहं
किं पापाय? किमन्धसे? किमपरं काचाय नीचाय वा?"।
"मा मातर्विषयोऽधुना हि भगवान् श्रीजानकीनायकः"
"श्लाघ्या नाम मतिस्तवापि तदहं तुष्टास्मि कामं लिखेः"॥ **1.3** ॥

जाता यद्रजसा दृषत् किल पुरा हृद्या मुनेर्भामिनी
यत्सङ्गेन पदावनी च समये पूर्णावनीपालिनी।
यत्सञ्चारपवित्रितो वितनुते सेतुर्जगन्मङ्गलं
सा सीतापतिपादपद्मयुगली भूयान्मम श्रेयसे॥ **1.4** ॥

महीधरमहीरुहप्रभृतिवर्णनैरङ्किता
    ममाद्य कविता मुहुर्मृगयतेतरां निष्कृतिम्।
अथो विधिविपाकतो निजमनोरथं लम्भिता
    गृणाति करुणानिधेः रघुपतेश्चरित्रामृतम्॥ **1.5**॥

कृतिर्नवीनाऽपि ममातिलघ्वी
    कृतीश्वराणां नियतं मुदे स्यात्।
लिखन्ति बालाः कुटिलां हि रेखां
    तथाऽपि मोदाय पितुर्भवन्ति॥ **1.6**॥

आसीदशेषावनिपालमौलि -
    मालापरिष्कारकपादपद्मः।
आनन्दिताखण्डलचित्तवृत्तिः
    राजा पुरा पङ्क्तिरथाभिधानः॥ **1.7**॥

न रूपमात्रेण स मन्मथोऽभूत्
    तदीयकार्येण च तादृशोऽभूत्।
जिगाय यश्शाम्बरमात्तधन्वा
    स्त्रियः पुनस्तद्रतयस्तु तिस्रः॥ **1.8**॥

अतस्स्वयं मन्मथतातपादः
    तथाविधं मन्मथमन्मथत्वम्।
अवाप्तुकामः पितृताममुष्मिन्
    अरोचयद्यो मनसा विचार्य॥ **1.9**॥

य यज्ञभुक् यज्ञकृतोऽस्य राज्ञः
    श्रीरामसंज्ञामहितोऽथ जज्ञे।
तमन्वजायन्त ततस्त्रयस्ते
    त्रिलोकसन्तापनिवारणाय॥ **1.10**॥

अङ्कादथाङ्कं किल लालितास्ते
　राज्ञश्च राज्ञो महिषीजनस्य।
प्रापुर्यथा तद्वतमून् क्रमेण
　विद्याश्च सर्वास्सुभगा अवापुः॥ **1.11** ॥

अथो कदाचित् कुशिकात्मजन्मा
　मुनिर्नयज्ञोऽपि स यज्ञरक्षाम्।
विधातुमिच्छन् रघुवंशरत्नं
　ययाच तं कोसलदेशनाथम्॥ **1.12** ॥

वसिष्ठवाचाऽथ विनष्टशोकः
　समर्पयामास सुतं स तस्मै।
जगाम कस्मादनु लक्ष्मणस्तं
　रामस्य बाहुः किल दक्षिणस्स्सः॥ **1.13** ॥

तौ कौशिकोदीरितसत्कथाभिः
　अम्बाभिरात्मीयगृहे यथा वा।
संलालितौ नाम तथैव मार्गे
　श्रमं च मोहं च न जग्मतुस्तत्॥ **1.14** ॥

नो कौशिकं केवलमेनमेव
　व्योम्नि स्थितं कञ्चन कौशिकञ्च।
आनन्दयामास स सुन्दराङ्गः
　सुन्दस्त्रियं तां तरसा निहत्य॥ **1.15** ॥

सिद्धाश्रमं प्राप्य कृतातिथेयः
　सौमित्रियुक्तः स हि ताटकारिः।
सुबाहुमारीचबलप्रमाथी
　त्रिविक्रमत्वं प्रथयांबभूव॥ **1.16** ॥

कथां निजां कल्पलतां जनानां
विस्तारयन्नेष रघुप्रवीरः।
मारीचमेनं किल बीजमस्याः
संवापयामास समुद्रमध्ये ॥ **1.17** ॥

अथो मुनीनां मुदमावहन् सः
मनोरथे गाधिसुतस्य गच्छन्।
अल्पैरहोभिर्जनकस्य राज्ञः
पुरोपकण्ठाश्रममाससाद ॥ **1.18** ॥

मुनौ मुदा पश्यति तत्र चित्रं
शिला बभौ काचन सुन्दराङ्गी।
जग्राह सा रामपदाम्बुजाते
कराब्जमस्याः किल गौतमोऽपि ॥ **1.19** ॥

रघुप्रवीरस्य करांबुजातात्
सुन्दप्रियासूदनतः प्रशस्तात्।
पदाम्बुजातं महितं स मेने
मुनीश्वरो येन शिलाऽपि तन्वी ॥ **1.20** ॥

"परः पुमानेष तपःफलं मे
पदांबुजादस्य मही नु जाता"।
"सुतां मदीयां मिथिलाधिनाथात्
गृहाण रामे"ति किमत्र वक्तुम् ॥ **1.21** ॥

धनुर्धरेयं मिथिलाधिनाथ -
धरेति सर्वे किल विद्महेऽमी।
प्रचोदयात्यत्र समीहिते चेत्
तत्सर्वसिद्ध्यै न हि संशयोऽत्र ॥ **1.22** ॥

एवं स वेदोदितमन्त्रदर्शी
    मुनिः स्वचित्ते सुभगं विचार्य।
श्रिया समेतं मिथिलेन्द्रपुत्र्या
    रघूत्तमं नन्तुमियेष शीघ्रम्॥ **1.23**॥

श्रुत्वा स राजा जनको जनेभ्यः
    पुनानमेनं स्वपुरोपकण्ठम्।
त्वरासमेतः परिवारपूर्णः
    प्रत्युद्ययौ प्राञ्जलिरानताङ्गः॥ **1.24**॥

ब्रह्मर्षिराजर्षिसमागमं तं
    समागतो द्रष्टुमपीह लोकः।
शशाक दृष्टिं पतितां विधर्तुं
    ब्रह्मण्यहो राजनि तत्र रामे॥ **1.25**॥

ज्यां मातरं प्राप्यनिजप्रियायाः
    रामः प्रणामं जनकाय चक्रे।
जामातरं प्राह मुनिस्तमस्मै
    "ज्यामातरं प्राप्य कथं ह्ययं स्यात्?"॥ **1.26**॥

पुरी प्रदीप्तेति निशम्य वाचं
    प्रदह्यते किंचन मे नहीति।
उवाच यस्सोऽयमतीव धीरो
    मुमोह चित्रं मिथिलाधिनाथः॥ **1.27**॥

किं चित्रमत्रास्ति महानुभावे
    ब्रह्मैकनिष्ठे मिथिलाधिनाथे।
तद् ब्रह्म लक्ष्म्या सह नन्तुमिच्छन्
    चापं च रामं च मुमोह पश्यन्॥ **1.28**॥

आनन्दजातास्पदमेष कालः
    कस्मान्नु मोहो जनकात्र जातः।
एवं शतानन्दमुनीश्वरस्तं
    सानन्दसारं निजगाद वाणीम्॥ **1.29** ॥

स ब्रह्मविद्यां तव याज्ञवल्क्यः
    समादिशद् ब्रह्म पुनस्तदेव।
समानयद् गाधिसुतस्समीपं
    स एष सम्पूज्यतमो मुनीन्द्रः॥ **1.30** ॥

वसिष्ठगामेव पुरा नृपस्सन्
    अपेक्षते स्म स्वयमेष वीरः।
ब्रह्मत्वलाभावसरेऽपि तद्वत्
    तत् ब्रह्मलाभेऽपि तथैव जातम्॥ **1.31** ॥

समाश्रितं पालयितं त्रिशङ्कुं
    ससर्ज लोकान् सहसा नवीनान्।
समापयामास पशुं विनैव
    स एष सत्रं भगिनीसुतार्थम्॥ **1.32** ॥

रम्भा शिला येन बभूव नारी
    माता मदीयाऽथ शिलाऽपि नारी।
तादृक्प्रभावे कुशिकात्मजेऽस्मिन्
    अत्रागते का तव चापचिन्ता?॥ **1.33** ॥

इति प्रगल्भां मिथिलाधरेन्द्रः
    गिरं शतानन्दमुनेर्निशम्य।
निर्वाय मोहं निभृतोऽवतस्थे
    नितान्तमालोकितरामभद्रः॥ **1.34** ॥

मुनिस्तदा गाधिसुतो बभाषे
धनुर्वरं दर्शय राघवाय।
सुतां ततो दर्शयिताऽसि राजन् !
अस्येति हृद्यं सकलाभिनन्द्यम् ॥ **1.35** ॥

असङ्ख्यभृत्यावलिभिः श्रमेण
विश्रम्य विश्रम्य ततस्स कृष्टे।
धनुस्तदानीं शकटे ददर्श
मुनिं च मुख्यो रघुवंशजानाम् ॥ **1.36** ॥

भ्रूभङ्गमासाद्य मुनीश्वरस्य
चापस्य भङ्गं मनसा विभाव्य।
उत्पस्य शीघ्रं रघुवंशनाथः
हस्तेन जग्राह पुरारिचापम् ॥ **1.37** ॥

रामो यतो मन्मथमन्मथस्तत्
क्रुधेव चापं पुरमर्दनस्य।
आधाय चारोप्य बभञ्ज मध्ये
स्वमाश्रमं च प्रथमं सहैव ॥ **1.38** ॥

सुबाहुविध्वंसिसुबाहुवीर्यं
विलोकयन्तीति विदेहकन्या।
विवाहचिन्ताविवशा स्वशीर्ष -
सुखोपधानं चकमे हृदा तत् ॥ **1.39** ॥

ततस्स तातस्य समागतस्य
निपीड्य तूर्णं पदपङ्कजातम्।
अनुज्ञया तस्य विदेहपुत्र्याः
निपीडयामास कराम्बुजातम् ॥ **1.40** ॥

अथोर्मिला लक्ष्मणपङ्कजाक्षी
सा माण्डवी श्रीभरतस्य देवी।
शत्रुघ्नजाया श्रुतकीर्तिरासीत्
एवं किलाचेष्टत गाधिसूनुः॥ **1.41** ॥

जायासमेतान् रघुनाथसिंहान्
आलोक्य सम्पूर्णमनोरथस्सन्।
कृछ्राद्विसृष्टः कुशिकात्मजन्मा
भूमेः पतिभ्यां तपसे जगाम॥ **1.42** ॥

विदेहराजेन स कोसलेन्द्रः
सुसत्कृतः पुत्रवधूसमेतः।
निजं पुरं भूषयितुं नितान्तं
ससैनिकः तत्पुरतः प्रथस्थे॥ **1.43** ॥

मध्येपथं धूर्जटिचापभङ्गात्
उपात्तकोपं जमदग्निजातम्।
दृष्ट्वैव राजा स हि कोसलानां
मूर्च्छामविन्दन्महतीमवार्याम्॥ **1.44** ॥

पितुश्च मूर्च्छां जमदग्निसूनोः लोकांश्च मान्यानपि गर्वधाटीम्।
एकेन टङ्काररवेण रामः तच्चापजातेन निराचकार॥ **1.45** ॥

मध्येमार्गं निजधनुरथो वीरलक्ष्मीञ्च लोकान्
तेजो नैजं परममपि तत् भार्गवादेष हृत्वा।
गत्वाऽयोध्यां जनकतनयाचन्द्रिकादर्शनीयः
मोदाम्भोधिं जनहृदि बभौ वर्धयन् रामचन्द्रः॥ **1.46** ॥

॥ इति श्रीमति मञ्जुरामायणे सीताविवाहो नाम प्रथमः सर्गः॥

## ॥ पादुकाभिषेकः द्वितीयः सर्गः ॥

अथ मातुलगेहगामिना
सुतरां प्रीतिपुरस्कृतो ययौ।
अनघस्स हि लक्ष्मणानुजः
भरतेन श्रुतकीर्तिनायकः ॥ **2.1** ॥

धरणीतनयापतिं ततः
धरणीनायकमेव भूपतिः।
चकमे जनताभिनन्दितः
विबुधा नाम तदा न सेहिरे ॥ **2.2** ॥

अथ ते भरतस्य मातरं
सततं रामगुणामृताप्लुलाम्।
निजशक्तिवशीकृतान्तरां
कुटिलां मन्थरया वितेनिरे ॥ **2.3** ॥

प्रसुवा भरतस्य वञ्चितः
प्रथितं स्वं तनयं स भूपतिः।
प्रमदामणिलक्ष्मणान्वितं
प्रणतं हा ! व्यसृजद्वनाय तम् ॥ **2.4** ॥

पुरतो रथतोऽथ निर्गतः
पुरलोकानुगतस्स राघवः।
पुरमर्दनमौलिभूषणं
पुरतस्तत्र ददर्श वाहिनीम् ॥ **2.5** ॥

गुहमानतमात्मनः पदे
नयनाभ्यामपिबन्न वाहिनीम्।

अथ कृच्छ्रविसर्जितो रुदन्
    स सुमन्त्रस्सरथः पुरं ययौ ॥ **2.6** ॥

असुतो धरणीपतिस्तदा
    स सुमन्त्रस्य विलोक्य तन्मुखम्।
असुतोऽपि वियोगमञ्जसा
    करुणं प्राप कथा विधेरिति ॥ **2.7** ॥

भरतः किल मातुलालयात्
    अतिदुःस्वप्ननिवेदिताशुभः।
निजपत्तनतस्समागतैः
    सह दूतैस्समुपागतः पुरीम् ॥ **2.8** ॥

निजमातृसमाख्यया बहिः
    द्विवराभिख्यकटुद्विजिह्वया।
पितरं परिपीतजीवितं
    भरतस्तत्र ददर्श विह्वलः ॥ **2.9** ॥

अपि भानुकुलं सनातनं
    कलयन्ती तमसा तिरस्कृतम्।
जननीति ममेयमुत्थिता
    सहसा काचन कालयामिनी ॥ **2.10** ॥

जनबाष्पजलाशयप्रिया
    वरशृङ्गद्वयभीमदर्शना।
मलिना मतिमान्द्यपीवरा
    महिषी सत्यमियं महीपतेः ॥ **2.11** ॥

सुरलोकमितः पिता गतः
मम रामो मुनिलोकमेतया।
जननी जनबाष्पवारिभिः
स्वयमात्मानमिहाभिषिञ्चतु॥ **2.12** ॥

अनयाऽनयया ज्वरस्पृशः
परितापं नितरामुपेयुषः।
अपि रामपदाम्बुजद्वयी
मम शान्त्यै भविता तु मस्तके॥ **2.13** ॥

इति राघवमातुरग्रतः
जननीकृत्यसुतप्तमानसः।
विलपन् विधुताखिलाङ्गकः
भरतस्तत्र पपात भूतले॥ **2.14** ॥

सुतनायकशोकविह्वला
तनया दक्षिणकोसलेशितुः।
भरते पतितेऽथ भूतले
समभून्निर्गतजीवितेव सा॥ **2.15** ॥

अथ तत्र वसिष्ठभारती
महनीया समयानुसारिणी।
अपशोकममूर्च्छनं जनं
नरनाथं च चकार संस्कृतम्॥ **2.16** ॥

अवधीरितराज्यवैभवः
भरतो भ्रातृसमीक्षणाकुलः।
सहसा सजटस्सवल्कलः
सहसैन्यः प्रविवेश काननम्॥ **2.17** ॥

प्रथमं स गुहेन शङ्कितः
परतो लक्ष्मणतोऽपि पूजितः।
अथ रामत एव नन्दिदः
पथि रेजे विपिनेऽनुगामिना ॥ **2.18** ॥

इति तत्र विकल्प यद्गुहः
भरतं निश्चितवान् गुणोत्तरम्।
अत एव बभूव धीवरः
परथा नाम कथं घटेत तत्? ॥ **2.19** ॥

अथ तत्र मुनिं प्रयागगं
प्रणनाम प्रयतस्स मातृभिः।
स च विस्मयसंपदां पदं
सहसैन्यस्य चकार भोजनम् ॥ **2.20** ॥

मुनिबोधितवर्त्मना गतः
गिरिमेकं विपिने ददर्श सः।
विहृतीर्वितनोति सीतया
विविधा यत्र स लक्ष्मणाग्रजः ॥ **2.21** ॥

अतिदूरत एव तद्गिरेः
भरतः प्राञ्जलिरानतो ययौ।
अवशादथ चक्षुषोरभूत्
विषये बालमुनेः स चाश्रमः ॥ **2.22** ॥

अथ लक्ष्मणसेवितं पुरः
जगतीपोतविभूषितान्तिकम्।
अतिनूतनवल्कलाश्रयं
जटया धिक्कृतपार्वतीपतिम् ॥ **2.23** ॥

अवधीरितराज्यसंपदं
　　सकलानां जगतामधीश्वरम्।
अनुभावविशेषशोभितं
　　वपुषा निर्जितशंबरान्तकम्॥ **2.24**॥

धनुषा निजपृष्ठलम्बिना
　　भृशवित्रासितसर्वशात्रवम्।
अनघस्मितमंबुजेक्षणं
　　भरतस्तत्र ददर्श राघवम्॥ **2.25**॥

अहहार्य! समागतोऽस्म्यहं
　　तव निर्वासयिता पुरादिति।
मनसा कलयन् स कैक-
　　यीतनयस्तत्र पपात तत्पुरः॥ **2.26**॥

पुरतः पतितं रजोभरैः
　　मलिनं बाष्पविदूषिताननम्।
भरतं सहसा समुत्थितः
　　स्वयमुत्थापयति स्म राघवः॥ **2.27**॥

किमिदं भरतेति साश्रुणा
　　दृढमालिङ्ग्य स माण्डवीपतिः।
जगदे जगदेकधन्विना
　　मृदुना पाणितलेन लालितः॥ **2.28**॥

कुशली नगरे नु नः पिता
　　कुशली मातृगणः पितृप्रियः।
कुशलं जनतामवेक्षसे
　　कुत एवं समुपागतो वनम्?॥ **2.29**॥

इति पृच्छति जानकीप्रिये
भरतो मन्दमिदं जगाद तम्।
भवदीयपथानुगानसून्
पितुरन्वेषितुमागतोस्म्यहम्॥ 2.30॥

इति वादिनि माण्डवीप्रिये
युगपत्तत्र विवर्तिषु त्रिषु।
वदनादह! हन्त! हन्त! हे-
त्युदभूदक्षरशोकसन्ततिः॥ 2.31॥

मम वल्कलमञ्जसा क्षिपन्
अपि संख्याय समाश्चतुर्दश।
सुभगाम्बरभूषणानि मे
स ददौ हेति मुमोह जानकी॥ 2.32॥

अटवीवसतिं समापयन्
अहमालोकयिता नराधिपम्।
इति नाम मनोरथो मुधा
स बभूवेति मुमोह राघवः॥ 2.33॥

मम नाम तदैव निश्चितं
कथितं चापि सुमन्त्रसन्निधौ।
भरतेति शुचा रुषा च सः
विवशस्तत्र जजल्प लक्ष्मणः॥ 2.34॥

अथ तत्र जनैस्समागतैः
मुनिभिश्शान्तविषादसम्भ्रमः।
उदकं प्रददौ सलक्ष्मणः
प्रयतस्सन् जनकाय राघवः॥ 2.35॥

अथ मातृभिरात्ममन्त्रिभिः
मिलितस्तत्र तदा पदे पदे।
उपशान्तसमुद्गताम्बुदं
घनघस्त्रं स चिरं व्यडम्बयत्॥ **2.36**॥

विधिनैव कथञ्चिदाशया
विहितं तत्र समापनं शुचः।
अथ साधुजनस्समीक्षते
भरतो वक्ष्यति किंन्वसाविति॥ **2.37**॥

अवदद् भरतस्तदा नतः
सवसिष्ठो रघुवंशनायकम्।
परिपालय मेदिनीं प्रभो !
वनवासं त्यज पूरयेप्सितम्॥ **2.38**॥

अथ चेद्वनवास इष्यते
मयि सोऽयं कृपया निवेश्यताम्।
न हि राज्यधुरं तथाविधां
तव वोढुं प्रभुरस्मि बालकः॥ **2.39**॥

इति साधु निवेदितं तदा
भरतेनानतमौलिशालिना।
समितौ सकलानुमोदितं
ननु सीतापतिना मनागपि॥ **2.40**॥

इति वादिनि माण्डवीपतौ
भगिनीस्नेहसमाकुलात्मनः।
उदभूदपरेव भूमिका
तनयाया जनकस्य पादुका॥ **2.41**॥

मणिकांचनरत्नधारिणी
मनुवंशोत्तमपादधारिणी।
महिता सततं महर्षिभिः
मधुरा मञ्जुलशिञ्जितस्वना ॥ **2.42** ॥

कुशकण्टकमर्दनं पुरः
पथि नाथस्य वितन्वती वने।
अवनीतलमञ्जुलालिता
तनुमध्या तपनीयपादुका ॥ **2.43** ॥

उदितां पुरतो विलोक्य तां
मणिशोभाततिभिस्समुज्ज्वलाम्।
निजवंशतमोनिवर्तिनीम्
इव मूर्तिं महितां विवस्वतः ॥ **2.44** ॥

अवदञ्चतुराननात्मजो
भरतं तत्र गुरुस्सनन्दथुः।
मम वागुदभूत् पुरे पुरा
तव मातुः पुरतः परं क्रुधा ॥ **2.45** ॥

इयमेव विदेहनन्दिनी
भुवनं पातुमलं भवेदिति।
अथ सैव ऋतं यतः पुरो
ननु सीतेव विभाति पादुका ॥ **2.46** ॥

इयमेव सुवर्णपादुका
सकलां धारयितुं क्षमां क्षमा।
अभिवन्द्य गृहाण पादुकाम्
इह रामस्य दयामिवोत्थिताम् ॥ **2.47** ॥

ननु रामपदानुगामिनी
नगरश्रीस्तव वृत्ततोषिता।
अधुना किल पादुकात्मना
तव पाणिग्रहणं समीहते॥ **2.48** ॥

इति वादिनि धातृसंभवे
मुनिनाथे भरतः कृताञ्जलिः।
समितौ सहसा समग्रहीत्
शिरसा तां मणिपादुकाद्वयीम्॥ **2.49** ॥

अथ साधुवचस्समाकुलं
तरसा पूरितहर्षनिर्भरम्।
अखिलं तदभूत् सदस्तदा
भविकं नाम हि पादुकादृशा॥ **2.50** ॥

अखिलं वहतो जगत् सुखं
ननु रामस्य विभाति वाहिनी।
इति तां भरतस्समग्रहीत्
भुवनं वोढुमतीव बुद्धिमान्॥ **2.51** ॥

अथ शिरसि निधाय पादुकां ताम्
अभजत पत्तनमात्मनस्स भव्यम्।
निजपतिविरहं विभावयन्ती
नगरबहिर्भुवि सा ततान वासम्॥ **2.52** ॥

अपूजयत् स पादुकामथोऽभिषिच्य भक्तिमान्
अनेकलोकमानितामशेषमङ्गलास्पदम्।
लघुर्गुरुर्निरन्तरं स पञ्चचामरोत्तमैः
लघुर्गुरुर्निरन्तरं भवेत् स पञ्चचामरः॥ **2.53** ॥

ननमयशुभरागैः पादुकां भोगिलोकै
    रतनुत नुतकीर्तिं माण्डवीनायकोऽयम्।
सुरभिसुमसमाजैर्मालिनीं तां वितेने
    ननमययुतेयं मालिनी भोगिलोकैः॥ **2.54** ॥

एवं श्रीरामपादादपि किल महिता स्रग्धरा पादुका सा
    साकेतान्तर्वसन्तीं प्रतिसदनमहो दुःखमूर्तिं तदानीम्।
लक्ष्मीमानन्दरूपां सपदि विदधती स्मारयन्ती शिलां तां
    नारीभूतां मुनीन्द्रैरभिनुतविभवा राज्यरक्षां वितेने॥ **2.55** ॥

॥ इति श्रीमति मञ्जुरामायणे पादुकाभिषेको नाम द्वितीयः सर्गः॥

## ॥ सेतुबन्धः तृतीयः सर्गः ॥

अथ पादुकया रामः दययेव विनाकृतः।
अनिशाचरसञ्चारामटवीं कर्तुमैहत ॥ **3.1** ॥

अङ्गरागादिकैर्दिव्यैरनसूयाप्रसादितैः।
अवनीतनया साऽभूदतीव प्रियदर्शना ॥ **3.2** ॥

यातुधानवधाभिख्यं तपोधनमनः प्रियम्।
आम्नायं नवमारब्धं विराधः प्रणवोऽभवत् ॥ **3.3** ॥

व्रीडाकरं हि वीराणां शरभङ्गस्य दर्शनम्।
सर्वलोकैकवीरस्य रामस्य तदभून्मुदे ॥ **3.4** ॥

पर्णशालामलङ्कर्तुं रामः पञ्चवटीवने।
कुतुकी नितरां जज्ञे कुम्भजातावलोकने ॥ **3.5** ॥

पञ्चवट्याममुं दृष्ट्वा द्विपञ्चरथसंभवम्।
पञ्चबाणार्दिता जज्ञे द्विपञ्चमुखसोदरी ॥ **3.6** ॥

सौमित्रिपत्रिविकृतमुखी शूर्पणखी ततः।
खरपादग्रहं तेने भूयोऽनर्थाय केवलम् ॥ **3.7** ॥

लेखहिंसा वितन्वन्तमन्वर्थखरनामकम्।
वर्णरक्षाकरो रामस्सानुगं सहसाऽवधीत् ॥ **3.8** ॥

खरे त्रिशिरसि प्राप्ते क्षयं शूर्पणखी ततः।
खरं दशशिरोयुक्तं जगाम शरणार्थिनी ॥ **3.9** ॥

स च मारीचमगमत् स च मारिस्तवोचितः।
राघवो रावणेत्येवं मुहुर्मुहुरबोधयत् ॥ **3.10** ॥

तथाऽपि सीतामहरद्रावणस्तस्य मायया।
लङ्काश्रीरपि सञ्जाता विभीषणविलोकिनी ॥ **3.11** ॥

अङ्केनादाय वैदेहीं शङ्कातङ्कप्रकम्पिताम्।
लङ्काधिपं निपाद्याथ लङ्का लङ्काधिपो ययौ ॥ **3.12** ॥

सीताऽशोकवनं भेजे रामश्शोकवनं ततः।
वाल्मीकिः कवनं तत्र सर्वचक्षुस्ततो वनम् ॥ **3.13** ॥

कारणं जगतां रामश्चैतन्यमपि कार्यगम्।
स्मरन्निव समप्राक्षीत् तरुवीरुन्नदीगिरीन् ॥ **3.14** ॥

तेऽपि शोणितदिग्धाङ्गं गृध्रराजमदर्शयन्।
स च रावणनीतां तां सीतामुक्त्वा जहावसून् ॥ **3.15** ॥

ददाह तमसौ रामस्सीतार्थे त्यक्तजीवितम्।
चचार स समान् लोकानन्वेष्टुमिव जानकीम् ॥ **3.16** ॥

अयो मुखे हि सीतायाः सा नष्टेति रुषेव सः।
अयोमुखीमथो चक्रे रामश्शूर्पणखीमिव ॥ **3.17** ॥

इन्द्रेण ताडितः पूर्वं कबन्धो रामताडितः।
सुग्रीवमिन्द्रपुत्रारिं भजेति स समादिशत् ॥ **3.18** ॥

शबरीममरीभूतां पम्पामानसकम्पनीम्।
आलोकयन्तौ तावास्तां भ्रातरौ रामलक्ष्मणौ ॥ **3.19** ॥

शोकानलं परं तत्र ज्वलन्तमनयोर्हृदि।
वातजातस्समागत्य शान्तं चक्रे तदद्भुतम् ॥ **3.20** ॥

सूरसूनुं हि सुग्रीवं सुहृदं प्राप्य राघवः।
सुराधिपसुतं तेने सुरलोकसुधातिथिम् ॥ **3.21** ॥

हरयो हरिनाथेन प्रेषिता हरितो दश।
अङ्गदप्रमुखैर्वीरैः हनुमान् दक्षिणामगात्॥ **3.22** ॥

तत्र सम्प्राप्तसम्पातिवचनात् पवनात्मजः।
इयेष सरितां नाथं स एष परिलङ्घितुम्॥ **3.23** ॥

नभस्वतस्तनूजातं नभस्यतिजवान्वितम्।
लोकालोकदसंप्राप्तलोकं लोको व्यलोकयत्॥ **3.24** ॥

सदागतितनूजातसदागतिकृतादराः।
दक्षिणा हरयोऽभूवन् दक्षिणाशाकृतेक्षणाः॥ **3.25** ॥

नीताया रावणेनाथ सीताया मार्गणे रतः।
हनुमानगमद्वेगात् तनुमानिव मारुतः॥ **3.26** ॥

सुरसामजयन्मार्गे सुरसाहायकोविदः।
उरसा मानयन्नद्रिं तरसा हतसिंहिकः॥ **3.27** ॥

तरणे जलधेरुत्कः स रणे च निशाचरैः।
निशि तामविशल्लङ्कां निशिताग्र्यधियां वरः॥ **3.28** ॥

लङ्का सन्ताडिता तेन शङ्कातङ्काकुलान्तरा।
दशाननविभोरेतद् दुर्दशाननमित्यगात्॥ **3.29** ॥

मतिमान् हनुमांस्तत्र गतिमान् तनुमूर्तिमान्।
चचार बहुशोऽत्रस्तः स चराचरसङ्कुले॥ **3.30** ॥

ऊरुभिर्जघनैरास्यैश्चारुभिर्हृदयङ्गमाः।
सुदृशो बहुशो दृष्टाः सुदृशा सदृशीः श्रियः॥ **3.31** ॥

मैनसा युयुजे सोऽयं मनसा यदभूच्छुचिः।
मन्दोदरीमथो दृष्ट्वा मन्देतरमुदान्वितः॥ **3.32** ॥

चकार निजजात्युत्थविकारमखिलं कपिः।
मयस्य तनया हीयं प्रियस्य सविधे स्थिता ॥ **3.33** ॥

अयस्य च मुखे यस्याः भयस्य च न हि स्थितिः।
मिथिलाकन्यका नेति शिथिलान्तरनन्दथुः ॥ **3.34** ॥

चिन्तां बहुविधां भेजे हन्ताधिहृदयं पराम्।
रक्षिता नैव सा बाला भक्षिता रक्षसा पुनः ॥ **3.35** ॥

पतिता सागरे किं सा पतिताङ्काद्भयाकुला।
निशान्तमखिलं दृष्ट्वा निशान्तं प्राप्य मारुतिः ॥ **3.36** ॥

अशोकवनिकां भेजे सशोकजनकात्मजाम्।
रामं श्याममुपासीनां रामां श्यामां सदा हृदि ॥ **3.37** ॥

विदेहतनयां दीनां विदेहतनयामिव।
पद्मिनीमितरां क्लिष्टां पद्मिनीमिव वानरैः ॥ **3.38** ॥

बाहुन्यस्तमुखीं वेण्या राहुग्रस्तेन्दुरात्रिवत्।
उष्णमश्रु प्रमुञ्चन्तीमुष्णांशुदृषदं यथा ॥ **3.39** ॥

निशाचरीभिस्संवीतां पिशाचीभिश्शिवामिव।
निश्वासबहुला तत्र विश्वासपरिवर्जिताम् ॥ **3.40** ॥

कृष्णवेणी विधून्वन्तीं कृष्णपक्षनिशामिव।
तृष्णां राममयीं प्राप्तां कृष्णाम्बुजविलोचनाम् ॥ **3.41** ॥

अक्षि भीत्या च शोकेन विक्षिपन्तीमितस्ततः।
रक्षिकाभिः परं छन्नां मक्षिकाभिर्यथा मधु ॥ **3.42** ॥

तर्जितां राक्षसस्त्रीभिः भर्जितामिव मालिकाम्।
कलिनेव सतीं बुद्धिं बलिना कलुषीकृताम् ॥ **3.43** ॥

मलिनाम्बरसंवीतामलिना सुलतामिव।
हरिनिस्वनवित्रस्तां हरिणीमिव विह्वलाम्॥ **3.44** ॥

धुताशानां कृशां लघ्वीं हुताशनशिखामिव।
हुताशनसुहृत्सूनुः हताशपरिपीडिताम्॥ **3.45** ॥

करियूथपरिभ्रष्टां करिणीमिव कानने।
अदर्शनाय संलीनां ददर्श जनकात्मजाम्॥ **3.46** ॥

दृष्ट्वा हृष्टोवतस्थेऽथ यावत्तावत्तरूपरि।
मदिरापानसम्प्राप्तमदक्षीबालसैर्गतैः॥ **3.47** ॥

शयनादुत्थितं रक्षः नयनान्यभिनन्दयत्।
जनकात्मजया भीतेः जनकं तामुपागमत्॥ **3.48** ॥

स्वल्पेन परिवारेण स्वाकल्पेन च वर्मणा।
सीतामवोचदागत्य भीतां स्वीकुरु मामिति॥ **3.49** ॥

तृणमध्यमवोचत्तं निर्घृणं जानकी सती।
भज तं मम भर्तारं त्यज मां तत्पदाम्बुजे॥ **3.50** ॥

परदारित एव स्यात् परदाररतो नरः।
असतां त्यज मार्गं त्वं सतां सेवस्व सः श्रियैः॥ **3.51** ॥

कुले महति जातस्त्वं मले न हि मतिं कुरु।
अलं वैरेण तेनैवं बलं तव न नाशय॥ **3.52** ॥

वयसां पतिना तेन वायसः स्पर्धसे कथम्?।
आशरैस्सह हे! लङ्कां मा शरैस्तस्य नाशय॥ **3.53** ॥

इत्थं जनकनन्दिन्या पथ्यं तथ्यमुदीरितम्।
दोषाचरपतेरासीद्रोषायैव परं पुनः॥ **3.54** ॥

कोपेन महता कामतापेन च समाकुलः।
आदिश्य तत्तत् तत्रस्था आशरस्त्रीर्गृहान् ययौ ॥ **3.55** ॥

अथ सीतां समासाद्य भीतामासाद्य भाषितैः।
रामाङ्गुलीयकं दत्वा रामां कृत्वा मुदान्विताम् ॥ **3.56** ॥

उवाच रामवृत्तान्तं जग्राह मणिमुत्तमम्।
ततान परमं युद्धं तताप रजनीचरान् ॥ **3.57** ॥

शशास राक्षसपतिं शशाप च मुहुर्मुहुः।
ददाह नगरीं लङ्कामवाप रघुनन्दनम् ॥ **3.58** ॥

मुदाऽऽह जानकीवृत्तं सदा हरिगणार्चितः।
प्राप सर्वस्वभूतञ्च परिष्वङ्गं रघूत्तमात् ॥ **3.59** ॥

अथ दाशरथिः श्रीमान् शाखामृगगणैर्वृतः।
आच्छादयन् भुवं खञ्च प्रतस्थे रावणं प्रति ॥ **3.60** ॥

तीरं पयोनिधेः प्राप्य धीरं गर्जन्तमम्बुधिम्।
विहरन्तं वहन्तं तं विष्णुमन्तस्स्वकन्यया ॥ **3.61** ॥

वीचीभिः पृथुभिर्हस्तैः विक्षिपन्तमिवावनिम्।
आलोक्य महतीं चिन्तामवाप जगतीपतिः ॥ **3.62** ॥

अगस्त्यमुनिमामन्त्र्य पीतनीरममुं कुरु।
इत्येवं वदतो दृष्ट्वा कपीन् मन्दं जहास सः ॥ **3.63** ॥

एकवारं प्रभुर्गन्तुं तपस्वी पवनात्मजः।
यदि शक्तः पुनर्गन्तुं पृष्ठे नयतु वानरान् ॥ **3.64** ॥

पिबन्तु नोत्सृजन्त्वापो मेघा वारिनिधेरिति।
वदन्तः कपयो व्योम्नि ददृशुः पञ्च राक्षसान् ॥ **3.65** ॥

राक्षसा राक्षसेन्द्रस्य पञ्च प्राणा इवागताः।
अनुज्ञा दीयतां हन्तुमिति राममथार्थयन्॥ 3.66॥

यावत् पश्यति धर्मात्मा राघवस्तान् दिवि स्थितान्।
तावत्तेषु महानेको वाचमेवमुदाहरत्॥ 3.67॥

अङ्गपञ्चकसंयुक्ता शरणागतिरिष्यते।
वयं पञ्च रघूत्तंस ! ततस्त्वां शरणं गताः॥ 3.68॥

सीतां समर्पयेत्युक्तास्त्वां तु धिक् कुलपांसनम्।
इत्याह रावणो यन्मां त्यक्त्वा लङ्काऽपि तन्मया॥ 3.69॥

मदीयैर्मन्त्रिभिस्साकं भवदादेशवर्तिभिः।
रणेऽपि रावणं हन्तुं भ्रातरं कृतधीरहम्॥ 3.70॥

इति वाणीं समाकर्ण्य विभीषणसमीरिताम्।
अपश्यदखिलांस्तत्र सुग्रीवप्रमुखान् कपीन्॥ 3.71॥

अनुजो रावणस्यायमनृतं वक्ति राघव !।
अत्र नास्य वधादन्यदस्मभ्यमभिरोचते॥ 3.72॥

इति सर्वेषु कपिषु वदत्सु पवनात्मजः।
अब्रवीदात्मनो भावमतीव विनतस्तदा॥ 3.73॥

विभीषणोऽयं धर्मात्मा यत्समीपनिवासिना।
रावणेन जितं राम ! जितस्स भवताऽधुना॥ 3.74॥

एकस्तत्र मया दृष्टो लङ्कायां चरता तदा।
धर्म्ये पथि रतः श्रीमान् रामाऽसौ रावणानुजः॥ 3.75॥

इति वातभुवो वाणीमाकर्ण्य रघुनन्दनः।
प्रपन्नजनरक्षायां प्रवणस्तं समग्रहीत्॥ 3.76॥

लङ्काधिराज इति तं लक्ष्मणेन रघूत्तमः।
वेलायामभिरामायां साधु तत्राभ्यषेचयत्॥ **3.77**॥

तीरे शयानमथ तं मध्ये च मधुसूदनम्।
चचाल जलधिस्तत्र पश्यन्निव पुनः पुनः॥ **3.78**॥

गङ्गा भगीरथानीता त्वं च सागर इत्यहम्।
अचापमभियाचामि त्वं त्ववज्ञाय वर्तसे॥ **3.79**॥

अये ! समुद्र ! दुष्टात्मन् ! इति सन्धाय कार्मुके।
चकर्ष शरमाकर्णं राघवः कोपपूरितः॥ **3.80**॥

आपगाभिरनेकाभिरावृतः पयसा निधिः।
आसाद्य राघवं कार्यमाश्राव्य स तिरोदधे॥ **3.81**॥

अथो यथाबलं तदा क्रुधेव वानराधिपाः
    पयोनिधौ प्रचिक्षिपुर्महीरुहान् महीधरान्।
चचाल तेन मेदिनी प्रचुक्षुभे पयोनिधिः
    जगर्ज देवदुन्दुभिर्भयं विवेश राक्षसान्॥ **3.82**॥

सहसाऽपतदचलः किल सलिलान्तरदृश्यः
    भवतीति हि परिपश्यति कपिबृन्दमुदश्रु।
अनु तेन च सहपक्षति गिरिजालमनेकं
    सहसोत्पतदभिपश्यति कृतसेतु मुदश्रु॥ **3.83**॥

क्षिप्तं तत्र प्लवङ्गैर्गिरिकुलमखिलं विश्वकर्मात्मजातः
    दृश्यं विस्तीर्णदेहं सकलभरसहं वार्धिनेपथ्यभूतम्।
सेतुं बद्ध्वा क्षणेन क्षपितनमदघं राघवं प्राप्य भक्त्या
    पार्श्वे बद्धाञ्जलिस्सन्नभजत परमां प्रीतिमानन्द्यकीर्तिः॥ **3.84**॥

पुरा ममन्थ सागरं प्रियामवाप भार्गवीम्
    इतो बबन्ध सागरं स चाप्तुमद्य मैथिलीम्।
इति स्वयं मुनीश्वरास्सुरेश्वराः कपीश्वराः
    मुदा जगुस्सुनर्तनं तदा मदाद्वितेनिरे॥ **3.85**॥

पुरा रजःकणो विभोः पदांबुजातसंगतः
    चकार गौतमप्रियां व्रताच्च्युतां पतिव्रताम्।
पदाम्बुजातमर्दितादिहाम्बुजातधारितात्
    गिरिव्रजादपातकं समस्तयौवतं भवेत्॥ **3.86**॥

न चित्रमेतदिष्यते रघूत्तमाङ्घ्रिसेवनात्
    शिलाऽपि काऽपि कामिनी मुनिप्रियेति कीर्तिता।
इहाचला हि चञ्चलास्तदङ्घ्रिपद्मसेवनात्
    यदम्बुजातवासिनो विभान्ति सागरोत्थिताः॥ **3.87**॥

अतीव पापिनो जना भवन्ति येन पावनाः
    तरन्ति येन वानराः स्पृशन्ति कानि यं मुदा।
वदन्ति यं किलागमास्तथाविधाय सन्ततं
    नमो नमोऽस्तु सेतवे नमो नमोऽस्तु सेतवे॥ **3.88**॥

अमृतसेतुनिदेशविनिर्मितः
    स नलसेतुरभूद्भुवि कीर्तितः।
नलपदग्रहणेन भयङ्करः
    कलिरसौ विलयं भजतादिति॥ **3.89**॥

॥ इति श्रीमति मञ्जुरामायणे सेतुबन्धो नाम तृतीयः सर्गः॥

## ॥ श्रीरामपट्टाभिशेकः चतुर्थः सर्गः ॥

अथ स सेतुपथेन रघूत्तमः
  द्रुततरं पुरतो मनसा ययौ।
निबिडवानरसङ्घविलम्बितः
  द्रुतविलम्बितवृत्तसमस्थितिः ॥ **4.1** ॥

जलधिलङ्घनजातमदैरथो
  हनुमता परिवर्धितविक्रमैः.।
कपिगणैः परिपूरितदिङ्मुखैः
  दशमुखस्सुतरां किल तत्रसे ॥ **4.2** ॥

दशमुखं निजसौधसमाश्रयं
  सपदि तत्र विलोक्य कपीश्वरः।
उदपतच्च किरीटमपातयं
  रघुपतेरपि पार्श्वमुपाययौ ॥ **4.3** ॥

रघुपतेर्वचसा लघुविक्रमः
  दशमुखं प्रतिबोधयितुं तदा।
अथ गतः कपिनाथतनूभवः
  सरभसं प्रममाथ स गोपुरम् ॥ **4.4** ॥

परमकोपयुतोऽथ दशाननः
  परविभीषणकर्मविचक्षणम्।
परशुखड्गशरासनभास्वरं
  परबलं नियुयोज रणप्रियम् ॥ **4.5** ॥

शरणमेव वरं रघुनन्दने
  न हि रणं मम रावण ! साम्प्रतम्।

अथ रणं यदि नाम निषेवसे
    मरणमित्यपि माल्यवतोदितम् ॥ **4.6** ॥

प्रतपनं परिताप्य नलो बभौ
    गजहतस्तपनो विजहावसून्।
प्रघसमर्दनजातयशास्ततः
    कपिपती रघुनाथमनन्दयत् ॥ **4.7** ॥

निजपितामहजेतरि राक्षसे
    दशमुखस्य सुते स रुषाऽङ्गदः।
अतुरगं च विसारथिमञ्जसा
    निशि चकार रथं निखिलार्चितः ॥ **4.8** ॥

अथ स रावणिरुग्रपराक्रमः
    शरमयैः फणिभी रघुनन्दनौ।
परिबबन्ध परं परिदेवनं
    कपिबलेऽपि सुखेऽपि धराभुवः ॥ **4.9** ॥

सपदि तत्र तदा पतगाधिपः
    परपदात् प्रहितो नु जटायुषा।
अपगतव्रणमाहितकान्ति तत्
    दशरथात्मजयोर्विदधे वपुः ॥ **4.10** ॥

दशमुखः किल नीललघूकृतः
    पवननन्दनमुष्टिविघूर्णितः।
दशरथात्मजवीर्यविनिर्जितः
    विविधमाप विषादमथो हृदि ॥ **4.11** ॥

अथ निजावरजं किल मध्यमं
सततसुप्तमबोधयदञ्जसा।
न हि गजैः पृथुभिर्न च मुद्गरैः
विलपितैर्विविधैर्हि समुद्गतैः ॥ **4.12** ॥

स खलु सुप्तिविघातविलोकनात्
दशरथात्मजबाणसमर्पितम्।
कमपि लोकमविन्दत नूतनैः
अनुगतैश्च गतैश्च निरन्तरम् ॥ **4.13** ॥

अथ नरान्तकमङ्गदपातितं
त्रिशिरसं च समीरभुवा हतम्।
अपि च नीलहतं स महोदरं
दशमुखः श्रुतवानतिदारुणम् ॥ **4.14** ॥

गवयरभ्भनलादिहतं रणे
सकलमेव निशाचरसैनिकम्।
अथ विलोक्य दशास्यतनूभवः
किमपि कर्म चकार पितुः प्रियम् ॥ **4.15** ॥

तमतिकायमतीव भयङ्करं
शरकुलैरवधीत् स हि लक्ष्मणः।
अथ रुषा स पुरन्दरजित्पुनः
कपिबलं निखिलं समपीडयत् ॥ **4.16** ॥

सरसिजासनमन्त्रसमेधितं
स पुनरस्त्रमवाप्य तथाविधम्।
सकलवानरसाश्रुसमीक्षितं
दशरथात्मजयुग्ममपीडयत् ॥ **4.17** ॥

अथ तदा मरुतस्तनयो महान्
कमपि पर्वतमोषधिपूरितम्।
करतले किल कन्दुकवद्वहन्
गरुडवद्विचचार नभःपथे ॥ **4.18** ॥

तदनु मारुतिचेष्टितजीवितौ
नृपसुतौ न परं निखिलं च तत्।
कपिबलं निहतं च सजीवितं
न खलु जीवनगा रिपुसैनिकाः ॥ **4.19** ॥

तपननन्दनवागभिचोदिताः
दशमुखस्य पुरे कपयस्तदा.।
हुतवहं परितः परिचिक्षिपुः
पवननन्दनवक्त्रविलोकिनः ॥ **4.20** ॥

रघुपतिश्च दशाननसङ्गमात्
अपरिशुद्धमिदं नगरं पुनः।
हुतवहेन विशुद्धतमं मुहुः
मम विभीषणहस्तमुपैत्विति ॥ **4.21** ॥

कृतमतिस्स बभूव कुतूहली
जनकजाममिचिन्त्य तताप नो।
पवनसूनुनिवेदितमैथिली -
विषयदूरगपावकविक्रमः ॥ **4.22** ॥

अथ च कुम्भमपातयदञ्जसा
जलनिधौ दिवसाधिपनन्दनः।
न खलु कुम्भमवाप्य निशाचराः
हुतवहं शमयेयुरमीति किम्? ॥ **4.23** ॥

अपि निकुम्भवधं हनुमानथो
तदिति कुम्भपदं न पुरेऽभवत्।
दशमुखस्य कुतोऽपि न जीवनं
भवति हीति विधेरिति वैखरी ॥ **4.24** ॥

खरशिशुं स ददर्श रघूत्तमः
स तु हतोऽपि निमित्तमशोभनम्।
सपदि तत्र हि रावणिना हतां
हनुमता दयितामशृणोत्तदा ॥ **4.25** ॥

अथ विभीषणबोधिततन्नयः
स्वमनुजं कपिभिस्स निकुम्भिलाम्।
अगमयत् स च राममनुं जपन्
निहतवान्बलिनं किल रावणिम् ॥ **4.26** ॥

बिलपितैर्वनितावदनोद्गतैः
विविधबन्ध्वभिधाविशदीकृतैः।
विदितभूमिसुतावचनक्रमः
विहृतिमाप मुदा पवनात्मजः ॥ **4.27** ॥

अथ च मूलबलं निखिलं हतं
नृपसुतेन निरीक्ष्य दशाननः।
स्वयमसूंश्च समर्पयितुं तदा
कृतमतिः पुरतस्स विनिर्ययौ ॥ **4.28** ॥

रथगतं रजनीचरनायकं
रघुपतिं च रसातलसंस्थितम्।
रणतले स विलोक्य पुरन्दरः
रथमथो विससर्ज समातलिम् ॥ **4.29** ॥

त्रिदशनाथरथान्तरवस्थितं
दशरथस्य सुतं स दशाननः।
अखिलमर्मसु बाणगणैर्मुहुः
मुहुरहो नितरां समताडयत्॥ **4.30** ॥

दश शिरांसि रिपोरवतारयत्
रघुपतिस्सुखमर्धनिशाकरैः।
अथ किलार्धनिशाकरमौलिना
समभवन्नपि तानि पदे पदे॥ **4.31** ॥

इह न ते वसतिर्भुवि साम्प्रतं
व्रज यमस्य पुरीमिति किं बलात्।
रघुपतिस्स चकार रिपोर्गले
सततमर्धनिशाकरधोरणीम्॥ **4.32** ॥

निशिचरस्य विनाशमभीप्सता
दिनकरेण च मातलिना च सः।
अनुगृहीतमतिर्मतिदेवता -
प्रियतमास्त्रमथो किल संदधे॥ **4.33** ॥

निजमथावरजं तु विभीषणं
रघुपतेरनुजं च स लक्ष्मणम्।
अपि कपीनखिलानपि ताडयन्
रघुपतेरपि कोपमवर्धयत्॥ **4.34** ॥

अथ तदस्त्रमसून् न पपौ परं
दशमुखस्य शुचं च दिवौकसाम्।
न हि ससर्ज परं कपिनन्दथुं
दशशिरोवनितानयनाश्रु च॥ **4.35** ॥

दशरथं पितरं त्रिपुरान्तकं
सुरपतिं च पयोभवसंभवम्।
अतिमुदा समुपागतमन्तिके
प्रणमति स्म विदेहसुतापतिः॥ **4.36** ॥

प्रथमभूतमुवां निजनायिकाम्
इह स मध्यमभूतपरिष्कृताम्।
अखिलभूतनुतां रघुपुङ्गवो
यदकरोत्तदिदं न समञ्जसम्॥ **4.37** ॥

दयितया दयितैरपि वानरैः
अपि विभीषणमुख्यनिशाचरैः।
अथ स पुष्पकमुन्नतमास्थितः
प्रतिययौ स्वपुरं भरताग्रजः॥ **4.38** ॥

रघुपतिः पुरतः पवनात्मजं
निजपुराय विसृज्य मुनेः क्वचित्।
कपिबलैस्सह भोजनमद्भुतं
भरतवृत्तिकथाभिरचीकरत्॥ **4.39** ॥

पनस ! राक्षससङ्गविसर्जितः
त्वमसि तस्य वयं तव भक्षकाः।
इति तदा कपयः पनसस्पृशः
प्रहसनं विदधुर्मुनिभोजने॥ **4.40** ॥

दधिमुखो न भवानिह केवलं
वयमपीति मुदा कपयस्तदा।
दधिमुखा मुनिपुङ्गवभोजने
दधिमुखं जहसुर्विभुसन्निधौ॥ **4.41** ॥

यदि रणात् पुरतो मुनिना कृतं
    तदिदमुन्नतभोजनमीदृशम्।
न हि पलायनसङ्गतिरेव सा
    दशमुखानुजभूतविलोकने ॥ **4.42** ॥

इति वदत् कपिबृन्दमनेकधा
    परमतृप्तियुतं मुनिभोजनात्।
उदपतद् विभुना सह पुष्पके
    भरतदर्शनलालसमानसम् ॥ **4.43** ॥

हनुमता सहितो भरतस्तदा
    शिरसि पादुकया च विभूषितः.।
अथ निजाग्रजवीक्षणकौतुकी
    कपिकुलैर्ददृशे धरणीतले ॥ **4.44** ॥

अथ झटित्यवधीर्य रघूत्तमः
    भरतमानतमञ्जलिशालिनम्।
निभृतनन्दथुबाष्पमयाननं
    भुजयुगेन दृढं परिषस्वजे ॥ **4.45** ॥

अथ परस्परकण्टकितेन तौ
    शुभपुषा वपुषा किमु कीलितौ।
अतिचिरं यदमू परिरम्भणात्
    विघटनं न मनागपि लम्भितौ ॥ **4.46** ॥

सपदि मातृगणैस्सह मन्त्रिभिः
    परिवृतस्स च पादुकया धृतः.।
रथगतो रघुवंशविवर्धनः
    निजपुरीमगमन्निखिलेडितः ॥ **4.47** ॥

प्रयतवृद्धवसिष्टनिवेशितः
    प्रगुणरत्नमनोहरपीठके।
प्रवणया प्रियया सह सीतया
    प्रथितविप्रवरैरभिषेचितः॥ **4.48** ॥

रघुपतेरभिषेकमहोत्सवे
    क्वचन सा निहिता गृहकोटरे।
बहिरुपैतु न हीत्यभिरक्षिता
    पुरजनैरखिलैरपि मन्थरा॥ **4.49** ॥

इह न ते मनुजा अमरा हि ते मम सुतस्य मुखं शुभकुण्डलम्।
नयनयोर्विषयं कलयन्ति ये इति गिरं नृपतेर्जनता जगौ॥ **4.50** ॥

नयननन्दथुवारिनिवारितं रघुपतेर्वदनांबुजदर्शनम्।
तदपि चक्षुषि सर्वजने स्थितं समभवत् सुतरामभिषेचितम्॥ **4.51** ॥

अग्रे पादुकया दयाभ्यधिकया पार्श्वेऽपि भूमीभुवा
    वायोरात्मभुवा पदाम्बुजयुगीं सङ्गृह्णता सादरम्।
छत्रं चामरयोयुगं च वहता भ्रातृत्रयेणावृतं
    सर्वत्रापि नरैश्च वानरगणैः रामं भजे श्यामलम्॥ **4.52** ॥

श्रीमद्वेङ्कटशेषदेशिकमणेः पादाम्बुपानागत -
    ब्राह्मीनर्तनरङ्गभूतरसनाजाग्रत्तुरङ्गाननः।
विल्लूर् श्रीनिधिराघवः कविमणिः काव्यार्थवित्संमतः
    साकेताधिपतेश्चरित्रमुचितैर्वृत्तैरिदं निर्ममे॥ **4.53** ॥

॥ इति श्रीमति मञ्जुरामायणे श्रीरामपट्टाभिषेखो नाम चतुर्थः सर्गः॥

## ॥ इति मञ्जुरामायणं समाप्तम्॥